# hanumanmantrAH

# હનુમન્મન્ત્રાઃ

## Document Information

Text title : hanumanmantrAH

File name : hanumanmantrAH.itx

Category : hanumaana, mantra

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

hanumanmantrAH

# હનુમન્મન્ત્રાઃ

(પ્રપઞ્ચસારસારસઙ્ગ્રહતઃ)

૧. હનુમન્મન્ત્રસ્ય ઈશ્વરઃ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, હનુમાન્ દેવતા ।
હાં બીજં, નમઃ શક્તિઃ , મં કીલકં; મમ હનુમત્પ્રીત્યર્થે જપે
વિનિયોગઃ ।
હૃદયાદિ ન્યાસઃ -
ૐ નમો ભગવતે આઞ્જનેયાય હૃદયાય નમઃ ।
રુદ્રમૂર્તયે શિરસે સ્વાહા ।
વાયુસુતાય શિખાયૈ વષટ્ ।
અગ્નિગર્ભાય કવચાયહુમ્ ।
રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
બ્રહ્માસ્ત્રનિવારણાય અસ્ત્રાય ફટ્ ।

કરન્યાસઃ -
અઙ્ગુષ્ઠાભ્યાં નમઃ ।
તર્જનીભ્યાં નમઃ ।
મધ્યમાભ્યાં નમઃ ।
અનામિકાભ્યાં નમઃ ।
કનિષ્ઠિકાભ્યાં નમઃ ।
કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

ધ્યાનં -
સ્ફટિકાભં સ્વર્ણકાન્તિં દ્વિભુજં ચ કૃતાઞ્જલિમ્ ।
કુણ્ડલદ્વયસંશોભિમુખામ્ભોજં મુહુર્ભજે ॥

હૌ ૐ નમો ભગવન્ પ્રકટપરાક્રમ આક્રાન્તદિઙ્મણ્ડલ
યશોવિતાનધવલીકૃતજગત્ત્રિતય વજ્રદેહ રુદ્રાવતાર
લઙ્કાપુરીદહન ઉદધિબન્ધન /(લઙ્ઘન) દશગ્રીવકૃતાન્તક,

સીતાશ્વાસન, અઞ્જનાગર્ભસમ્ભવ, રામલક્ષ્મણાનન્દકર
કપિસૈન્યપ્રાકારક સુગ્રીવધારણ પર્વતોત્પાટન
બાલબ્રહ્મચારિન્ ગમ્ભીરશબ્દ સર્વગ્રહવિનાશન સર્વજ્વરોત્સાદન
ડાકિનીવિધ્વંસિન્ ૐ હ્રીં હા હા હા હંસ હંસ એહિ સર્વવિષં હર હર
પરબલં ક્ષોભય ક્ષોભય મમ સર્વકાર્યાણિ સાધય સાધય હું ફટ્ સ્વાહા ।

૨. અસ્ય શ્રીહનુમન્મન્ત્રસ્ય બ્રહ્મા ઋષિઃ ગાયત્રી છન્દઃ હનુમાન્ દેવતા
હાં બીજં હીં શક્તિઃ, હનુમત્પ્રીત્યર્થે જપે વિનિયોગઃ ।
હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ ઇતિ અઙ્ગન્યાસકરન્યાસૌ ।
ધ્યાનમ્ -
આઞ્જનેયમતિપાટલાનનં કાઞ્ચનાદ્રિકમનીયવિગ્રહમ્ ।
પારિજાતતરુમૂલવાસિનં ભાવયામિ પવમાનનન્દનમ્ ॥

ૐ નમો ભગવતે મમ મદનક્ષોભં સંહર સંહર
આત્મતત્ત્વં પ્રકાશય પ્રકાશય હુમ્ફટ્ સ્વાહા । (મન્ત્રોઽયં વિદ્યાપ્રદઃ)

૩. કશિં કુક્ષ વરવર અઞ્જનાવરપુત્ર આવેશિ આવેશિ (આવેશયાવેશય)
ૐ હ્રીં હનુમન્ ફટ્ ।
ઋષ્યાદિન્યાસાઃ પૂર્વવત્ । પિશાચાદિ નિવૃત્તિઃફલમ્ ।

૪. વસિષ્ઠઋષિઃ અનુષ્ટુપ્છન્દઃ । હનુમાન્ દેવતા ।
ૐ નમો હનુમતે મમ મદનક્ષોભં સંહર સંહર
આત્મતત્વં પ્રકાશય પ્રકાશય હુમ્ફટ્ સ્વાહા ઇતિ અઙ્ગન્યાસકરન્યાસૌ ।
ધ્યાનમ્ -
વામે જાનુનિ વામબાહુમપરં જ્ઞાનાખ્યમુદ્રાયુતં
હૃદ્દેશે કલયન્ વૃતો મુનિગણૈરધ્યાત્મદત્તેક્ષણઃ ।
આસીનઃ કદલીવને મણિમયે બાલાર્કકોટિપ્રભઃ
ધ્યાયન્બ્રહ્મ પરં કરોતુ મનસઃ સિદ્ધિં (શુદ્ધિં) હનૂમાન્મમ ॥

ૐ નમો હનુમતે મમ મદનક્ષોભં સંહર સંહર
આત્મતત્ત્વં પ્રકાશય પ્રકાશય હું ફટ્ સ્વાહા ।
(મદનક્ષોભશાન્તિવિદ્યાપ્રધાનોઽયં મન્ત્રઃ ।)
શીર્ષાલિકશ્રવણનેત્રકપોલનાસા
દોઃપાદસન્ધિકટિનાભિસપાર્શ્વહૃત્સુ ।
કણ્ઠાંસયુગ્મમુખમૂર્ધસુ ચ ક્રમેણ

મન્ત્રાક્ષરાન્ન્યસતુ શુદ્ધમતિઃ સ્વદેહે ॥ (ઇતિ ન્યાસક્રમઃ)
લક્ષં જપેત્ । કદલીફલૈર્વા પનસફલૈર્વા; સ્વાદુ (મધુ) પ્લુતૈઃ
દશાંશં પુરશ્ચરણહોમઃ ।
પૂજાક્રમઃ-
નવશક્તિસહિતે સામાન્યપીઠે આવાહ્ય અઙ્ગૈઃ
પ્રથમાવૃતિઃ, જામ્બવતે -વિનતાય -નીલાય -પનસાય -
ગન્ધમાદનાય-સુષેણાય -મૈન્દાય-દ્વિવિદાય -ઇતિ દ્વિતીયાવૃતિઃ ।
લોકેશૈઃ (દિક્પાલૈઃ) તૃતીયા । તદાયુધૈઃ ચતુર્થી ।
યન્ત્રં તુ કર્ણિકાયાં લિખેત્તારં સાધ્યગર્ભં ચ તદ્બહિઃ ।
અષ્ટપત્રે કેસરોદ્યત્સ્વરદ્વન્દ્વે મનોઃ ક્રમાત્ ॥

આદ્યે સપ્ત દ્વિતીયે ચ ચતુરોઽર્ણાસ્તૃતીયકે ।
સપ્ત તુર્યે પઞ્ચમે ચ ત્રીણિ ત્રીણ્યક્ષરાણ્યપિ ॥

ષટ્સપ્તમાષ્ટપત્રેષુ ચતુરશ્ચતુરોઽક્ષરાન્ ।
વૃત્તોલ્લસત્કાદિવર્ણં ભૂપુરાશ્રસ્થતારકમ્ ॥

હનૂમતો યન્ત્રમેતત્ વાઞ્છિતાર્થપ્રદં પરમ્ ।
ઇદમેવ વિલિખ્ય સાધુ યન્ત્રં નવનીતે પ્રતિજપ્ય મન્ત્રમેનમ્ ।
પરિભક્ષયતામનઙ્ગપીડા પ્રશમં ગચ્છતિ શુદ્ધિમેતિ ચેતઃ ॥

દ્વિતીયઃ પ્રયોગઃ -
આદાય દોષ્ણા સલિલં પ્રસન્નં પ્રજપ્ય મન્ત્રં પ્રપિબેત્ ત્રિવારમ્ ।
રાગાદિદોષપ્રશમાય બુદ્ધેર્જ્ઞાનોદયાય પ્રશમાય વૃત્તેઃ ॥

પુરશ્ચર્યાર્ણવતો હનુમન્મન્ત્રાઃ

૧. અષ્ટાદશાક્ષરો મન્ત્રઃ
અથાન્યં સમ્પ્રવક્ષ્યામિ મન્ત્રમષ્ટાદશાક્ષરમ્ ।
નમો ભગવતે પ્રોચ્ય આઞ્જનેયાય સંવદેત્ ॥ ૧॥

મહાબલાય સ્વાહેતિ મુનિરસ્યેશ્વરઃ સ્મૃતઃ ।
(નમો ભગવતે આઞ્જનેયાય મહાબલાય સ્વાહા)
છન્દોઽનુષ્ટુપ્ દેવતા તુ હનુમાન્ હૅં ચ બીજકમ્ ॥ ૨॥

સ્વાહા શક્તિશ્ચાઞ્જનેયો રુદ્રમૂર્તિર્મરુત્સુતઃ ।
અગ્નિગર્ભો રામદૂતો બ્રહ્માસ્ત્રવિનિવારકઃ ।

એતૈર્ઙેઽન્તૈઃ ષડઙ્ગાનિ તથાઙ્ગુષ્ઠાદિષુ ન્યસેત્ ॥ ૩॥

તપ્તકાઞ્ચનસઙ્કાશં હૃદયે નિહિતાઞ્જલિમ્ ।
કિરીટિનં કુણ્ડલિનં ધ્યાયેદ્વાનરનાયકમ્ ॥ ૪॥

અયુતં પ્રજપેન્મન્ત્રં દશાંશં જુહુયાત્તિલૈઃ ।
વિપ્રસન્તર્પણાદ્યં તુ પ્રાગ્વત્ સિદ્ધૌ ભવેન્મનુઃ ॥ ૫॥

જિતેન્દ્રિયો નક્તભોજી પ્રત્યેકં સાષ્ટકં શતમ્ ।
જપિત્વા ક્ષુદ્રરોગેભ્યો મુચ્યતે દિવસત્રયાત્ ।
ભૂતપ્રેતપિશાચાદિનાશાયૈવં સમાચરેત્ ॥ ૬॥

મહારોગનિવૃત્ત્યૈ તુ સહસ્રં ત્રિદિનં જપેત્ ।
યતાશનોઽયુતં નિત્યં જપેદ્ધ્યાયન્ કપીશ્વરમ્ ।
રાક્ષસૌઘં વિનિઘ્નન્તમચિરાજ્જયતિ દ્વિષઃ ॥ ૭॥

સુગ્રીવેણ સમં રામં સન્દધાનં સ્મરન્ કપિમ્ ।
પ્રજપ્યાયુતમાત્રં તુ સન્ધિં કુર્યાદ્વિરુદ્ધયોઃ ॥ ૮॥

લઙ્કાં દહન્તં તં ધ્યાયન્નયુતં પ્રજપેન્મનુમ્ ।
શત્રૂણાં પ્રદહેદ્ગ્રામાનચિરાદેવ સાધકઃ ॥ ૯॥

પ્રયાણસમયે ધ્યાયન્ હનુમન્તં મનું જપેત્ ।
યો યાતિ સોઽચિરાત્ સ્વેષ્ટં સાધયિત્વા ગૃહં વ્રજેત્ ॥ ૧૦॥

યઃ કપીશં સદા ગેહે પૂજયેજ્જપતત્પરઃ ।
આયુર્લક્ષ્મ્યૌ પ્રવર્ધેતે તસ્ય નશ્યન્ત્યુપદ્રવાઃ ॥ ૧૧॥

શાર્દૂલતસ્કરાદિભ્યો રક્ષેન્મનુરયં સ્મૃતઃ ।
પ્રસ્થાનકાલે ચૌરેભ્યો દુષ્ટસર્પાદપિ ધ્રુવમ્ ॥ ૧૨॥

પુચ્છાકારે સુવસને લેખિન્યા કોકિલોત્થયા ।
અષ્ટગન્ધૈર્લિખેદ્રૂપં કપિરાજસ્ય સુન્દરમ્ ॥ ૧૩॥

તન્મધ્યેઽષ્ટાદશાર્ણં તુ શત્રૂણામયુતં લિખેત્ ।
તેન મન્ત્રાભિજપ્તેન શિરોબન્ધેન ભૂમિપઃ ।
જયત્યરિગણં સર્વં દર્શનાદેવ નિશ્ચિતમ્ ॥ ૧૪॥

૨. અષ્ટાક્ષરો મન્ત્રઃ

અથાન્યં સમ્પ્રવક્ષ્યામિ મન્ત્રમષ્ટાક્ષરં પરમ્ ।

ષડ્દીર્ઘયુક્તા હૃલ્લેખા પ્રણવેન ચ સમ્પુટા ॥

અષ્ટાર્ણોઽયં હનુમતો મન્ત્રરાજઃ પ્રકીર્તિતઃ ।
ષડ્દીર્ઘયુક્તબીજેન ષડઙ્ગવિધિરીરિતઃ ॥ ૧૬॥

ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ ૐ
બાલાર્કાભં ત્રિભુવનં ક્ષોભકાન્ સર્વરાક્ષસાન્ ।
નાદેનૈવ ત્રાસયન્તં સુગ્રીવાદિકસેવિતમ્ ।
સુન્દરં રામચરણધ્યાનં ધ્યાયેત્સમીરજમ્ ॥ ૧૭॥

૩. દ્વાદશાક્ષરો મન્ત્રઃ
અથાસ્યાયં પ્રવક્ષ્યામિ દ્વાદશાર્ણં મહામનુમ્ ।
હૌં બીજં સમ્યગુચ્ચાર્ય પૂર્વોક્તં કૂટપઞ્ચકમ્ ॥ ૧૮॥

હનુમતે નમો મન્ત્રો રામચન્દ્રો મુનિર્મતઃ ।
જગતીછન્દ ઉદ્દિષ્ટં હનુમાન્દેવતા મતઃ ॥ ૧૯॥

બીજં તુ પઞ્ચમં કૂટં શક્તિરાદ્યં ચ કૂટકમ્ ।
ષડ્બીજૈઃ પ્રથમૈર્ન્યાસઃ ષડઙ્ગોઽસ્ય પ્રકીર્તિતઃ ॥ ૨૦॥

આદ્યન્તાકૃતિવેદાર્ણા બિન્દુરુદ્રસ્વરાન્વિતાઃ ।
હનૂમતસ્ત્વાદ્યકૂટમેતત્સાધક ઉચ્ચરેત્ ॥ ૨૧॥

પ્રકૃત્યાકૃતિવેદાર્ણા બિન્દુરુદ્રસ્વરાન્વિતાઃ ।
દ્વિતીયં કૂટમેતત્સ્યાદાદ્યન્તાકૃતિવર્ણકાઃ ॥ ૨૨॥

વિસર્ગેન્દુસ્વરોપેતાસ્તૃતીયં કૂટમુચ્યતે ।
આદ્યન્તસિદ્ધાકૃત્યબ્ધિવર્ણૈરીશસ્વરાન્વિતૈઃ ॥ ૨૩॥

સાનુસ્વારૈસ્તુર્યકૂટં સાદ્યઃ સૌઃ પઞ્ચમં મતમ્ ।
(હૌં હ્સ્ફ્રેં ખ્ફ્રેં હ્સ્રૌં હ્સ્ખ્ફ્રેં સઃ હ્સૌં હનુમતે નમઃ)
ધ્યાનં પૂર્વોક્તમેવાસ્ય જપેદર્કસહસ્રકમ્ ।
દશાંશં જુહુયાદ્વ્રીહીન્ પયોદધ્યાજ્યસંયુતાન્ ॥ ૨૪॥

૪. માલામન્ત્રઃ
અથાતઃ સમ્પ્રવક્ષ્યામિ માલામન્ત્રં વદેદ્ધ્રુવમ્ ।
વજ્રકાય વજ્રતુણ્ડ વદેત્ કપિલપિઙ્ગલ ॥ ૨૫॥

ઊર્ધ્વકેશ મહાબલ રક્તમુખેતિ કીર્તયેત્ ।

તડિજ્જિહ્વ મહારૌદ્ર દંષ્ટ્રોત્કટકહદ્ભયમ્ ॥ ૨૬॥

કરાલિને મહા પ્રોચ્ય દૃઢપ્રતિ ચ હા વદેત્ ।
હિ લઙ્કેશ્વર વેત્યુક્ત્વા ધાય મહા વદેત્પરમ્ ॥ ૨૭॥

સેતુબન્ધ મહાશૈલપ્રવાહ ગગનેચર ।
એહ્યેહિ ભગવન્ પ્રોચ્ય મહાબલપરાક્રમ ॥ ૨૮॥

ભૈરવાજ્ઞાપય પ્રોચ્ય એહ્યેહીતિ પદં વદેત્ ।
મહારૌદ્રપદં પ્રોચ્ય દીર્ઘપુચ્છેન વેષ્ટય ॥ ૨૯॥

વૈરિણં ભઞ્જય દ્વન્દ્વં હૂઁ ફડ્બાણાર્કવર્ણવાન્ ।
મુન્યાદ્યર્ચાપ્રયોગાદિસર્વં સૂર્યાર્ણવન્મતમ્ ॥ ૩૦॥

૫. અન્યો મન્ત્રઃ

નમઃ સબિન્દુમૃદ્ધૃત્ય હનુમન્તં ચ ઙેઽન્તકમ્ ।
રુદ્રાત્મકાય કવચમસ્ત્રં ચેત્યેકવર્ણકઃ ॥ ૩૧॥

મન્ત્રોઽયં હરિણા પૂર્વં દત્તો ગાણ્ડીવધન્વિને ।
એતસ્ય સાધનં કૃત્વા રણે વિજયમાપ્તવાન્ ॥

૬. અન્યો મન્ત્રઃ

સ્વબીજં પૂર્વમુચ્ચાર્ય ઙેઽન્તં પવનનન્દનમ્ ।
વહ્નિજાયાવધિ પ્રોક્તો મન્ત્રોઽયં સુરપાદપઃ ॥ ૩૩॥

ષડ્દીર્ઘભાજા બીજેન મન્ત્રાર્ણૈરઙ્ગકલ્પના ।
સ્વરૈઃ કાદ્યૈશ્ચ ક્ષાન્તૈશ્ચ પ્રાણાયામત્રયં ચરેત્ ॥ ૩૪॥

ૐ હં પવનનન્દનાય સ્વાહા ।
ધ્યાયેદ્રણે હનૂમન્તં કપિકોટિસમન્વિતમ્ ।
ધાવન્તં રાવણં જેતું દૃષ્ટ્વા સત્વરમુત્થિતમ્ ॥ ૩૫॥

લક્ષ્મણં ચ મહાવીરં પતિતં રણભૂતલે ।
ગુરુક્રોધં સમુત્પાદ્ય ગૃહીત્વા ગુરુપર્વતમ્ ॥ ૩૬॥

હાહાકારૈઃ સદર્પૈશ્ચ કમ્પયન્તં જગત્ત્રયમ્ ।
આબ્રહ્મ ચ સમાવ્યાપ્ય કૃત્વા ભીમકલેવરમ્ ॥ ૩૭॥

પૂજા તુ વૈષ્ણવે પીઠે લક્ષમેકં જપં ચરેત્ ।
તતઃ સિદ્ધમનુર્મન્ત્રી સાધયેત્સિદ્ધિમુત્તમામ્ ॥ ૩૮॥

બ્રાહ્મે મુહૂર્તે ચોત્થાય કૃતનિત્યક્રિયો દ્વિજઃ ।
ગત્વા નદીં તતઃ સ્નાત્વા તીર્થમાવાહ્ય ચાષ્ટધા ॥ ૩૯॥

સમ્પૂજ્ય હનૂમન્તં ષટ્સહસ્રં જપમાચરેત્ ॥ ૪૦॥

એવં સપ્તદિનાન્તે ચ સમાયાતિ કપીશ્વરઃ ।
રાત્રૌ ત્રિભાગશેષાયાં દદાતિ વરમીપ્સિતમ્ ॥ ૪૧॥

વિદ્યાં વાપિ ધનં વાપિ રાજ્યં વા શત્રુનિગ્રહમ્ ।
દદાતિ સાધકેન્દ્રાય સત્યં સત્યં સુનિશ્ચયમ્ ॥ ૪૨॥

---

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

---

*hanumanmantrAH*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*